IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# चरित्रचित्रम् : वेणी संहार नाटके

**डा0 वन्दना कुमारी**

**संस्कृत विभाग,**

**जयप्रकाश विश्वविद्यालय, छपरा**

संस्कृत नाटके चरित्रचित्रणस्य द्वितीयं स्थानमस्ति। संस्कृत नाटके प्रथम स्थान कथावस्तु एवभवति। कथानन्तरं नेता भवति। नेतुः समीक्षणं तस्य चरित्रचित्रणेन भवति। अतः अहम् अत्र चरित्र चित्रणं करोमि । पात्राणां चारित्र्यं चरित्रचित्रणस्य मूलाधारो वर्तते।

**चारित्र्यस्यार्थ** : – चारित्र्यमेवाश्रित्य वयमपि कर्तृषु केषांन गुणानामारोपं कुर्मः। चारित्र्यं नाम कस्याश्चन व्यक्तेः रूचिविरूच्योः प्रदर्शकत्वे सति तस्य नैतिक प्रयोजनस्याभि व्यञ्जकत्वम्।

प्रो0 बुचस्यामिप्रायो वर्तते यत् चारित्र्ये व्यक्तेनैतिक गुणदोषयोर्वलमवश्यभास्ते। अथापि तत्र व्यक्ति वैशिष्यस्याभावो नास्ति। शेक्सपियर – थैकरे प्रभृतीनां रचना सूपलभ्यभानं चारित्र्यस्याति वैयक्तिक रूपम् अरस्तु परिभाषतो वहिर्भवति । अथापि चारित्र्यं विशिष्ट व्यक्तित्वस्य द्योतनमवश्यं करोति।

चारित्रचित्रणस्यांधारभूतस्सिद्धान्त :– अरस्तु षण्णामाधारः सिद्धान्ताना निर्देशमकार्षीत्। तथाहि –

(1) प्रथमं सर्वाधिक महत्त्वपूर्णम.स्ति यत् चरित्रं भद्रभवेत्। नैतिकस्य द्योतकः किमपि वक्तव्यं कार्यव्यापारो वा चरित्रं व्यञ्जयति । उद्येश्ये भद्रे सति चरित्रमपि भद्रभवति।

अरस्तू : तु वक्ति यत् त्रासद्याम् मानवस्य भव्यतरं चित्रणं भवति। अभिप्रायो वर्तते यत् कथावस्तुवत् चरित्रचित्रणेनापि त्रासद्या तथाविधेन भाव्यम् , येन मानवस्य नैतिकी : भावना तुष्येत्।

(2) चरित्रचित्रणे द्वितीयं स्थानमौचित्यं बिभर्ति । पुरूषे विशेष प्रकारकं शौर्य भवति , किन्तु नारीचरित्रे शौर्यस्याथवा नैतिकविवेकशून्यस्य चातुर्यस्यः समावेशः अनुचितो भवतीति लिखति अरस्तु स्व काव्य शास्त्रे ।

(3) चरित्रं जीवनानुरूपं स्यादिति चरित्र चित्रणस्य तृतीयो नियमः। अयं गुणो भद्रतौचित्याभ्यां व्यतिरिच्यते। अस्याभिप्रायो वर्तते यत् पात्रैर्जीवद्भिर्जागरूकैश्च भाव्यम्।

(4) चरित्रे एकरूपता स्यात् इदंभवितुमर्हति यत् मूलेऽनुकार्ये एवं वैविध्यं स्यात् , अथापि तथानेक रूपं तथैवैकरूपतया भाव्यम् । इदं वक्तव्यम् अरस्तु विदुषः तत्त्वदर्शिनी प्रतिभा द्योतयति।

चरित्रस्याङ्कनविधिः विवेक समतो भवेत्।

(5) कथानकसङ्घटनवत् चरित्रचित्रणेऽपि कविः सदैव अवश्यम्भाविनं सम्भाव्यं वा स्वलक्ष्य कुर्यात्। अवश्यम्भाविनी घटना पूर्वापरक्रमेण एकस्यानन्तमपरा आयाति यथा तथैव आवश्यकतायाः सम्भाव्य नियमस्य वान्तर्गतं विशिष्टचरित्रस्य व्यकृत्या वक्तव्यमथवा कार्याणां सम्पादनं कर्तव्यम्।

(6) त्रासद्यां सामान्यापेक्षयोच्च्तराणाम्पुरूषाणामनु कृतिर्भवति। अतएव तत्र श्रेष्ठचित्रकाराणामादर्शाः संस्थापनीयाः। इमे चित्रकारा मूलप्रत्यङ्कन व्यति रिक्तामेतादृशी प्रतिकृतिं प्रस्तुवन्ति या जीवनानुरूपा जीवनापेक्षया मनोज्ञा चभवति। इति वक्ति अरस्तुः स्वकीयकाव्यशास्त्रे।

चरित्रचित्रणविषये भारतीय ऋषि : महर्षि व्यासेनोक्तम् धर्मेण देशस्य सुरक्षाभवति अधर्मेण देशस्य विनाशोमवति। अधार्मिकस्य धृष्टराष्ट्रस्य समूलं विनाशमभूत्। धार्मिक : अल्पबलयुक्तोपि युधिष्ठिरः सुरक्षितोबभूव। अतएव कल्याणकामिना पुरूषण आपद्यपि धर्मो नहि त्यक्तव्यः तथाहि –

न जातु कामान्मयान्न लोभाद्
धर्म त्यजेज्जीवितस्यापि हेतोः
धर्मोनित्यः सुखदुःखे त्वनित्ये जीवो
नित्यो हेतुरस्य त्वनित्यः।

मानव जीवनस्य आदर्शः कर्मैव वर्तते कर्महीनो मानवो मनुव्यत्वेन वञ्चितोभवति।

उक्तञ्चापि –

"प्रकाशलक्षणाः देवाः मनुष्याः कर्मलक्षणाः" विश्वस्मिन् विश्वे मनुष्य एवं सर्वश्रेष्ठों जन्तुः। विश्वस्य सर्वेषां वस्तुनां सृष्टिर्मनुष्याणामुपभोगायैव जाताः।

तैरेव वस्तुभिः सामाजिकी व्यवस्था भवति। गुह्यं ब्रह्य तदिदं ब्रवीमि नहिमानुषात् श्रेष्ठतरं हि किञ्चित्।

पुरूषार्थभव व्यासः पाणिवाद शब्देनाभिद्यन्ते। जगति हस्तैः संयुक्ताः कर्मसु कुशलाः उत्साहसम्पन्ना मनुष्याः लब्ध सर्व कामाभवन्ति। व्यासानुसारेण हस्तान्नास्ति परंधनम्। हस्त सञ्चालनेन हस्त कौशलप्रदर्शनेनैव मानव जीवनं सफलं जातम्। अकर्मण्येव मानवजीवनस्य महत् पापमे । अतएव श्रुति प्रतिपादयति :

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।

'यथा वेणीसंहार नाटके राज्यप्रेम भावना परमोदात्ता , विशुद्धा ओजस्विनी च वर्तते। युगधर्माणां विषये तस्य सामयिकं प्रसङ्गं वर्णयतिमुनिवरो भरतः। तद्यथा –

पूर्व कृतयुगेविप्रा वृत्ते स्वायम्भुवेऽन्तरे।
त्रेतायुगे सम्प्रवृते मनोवैवस्वतस्य तु मनोः
ग्राम्यधर्म्ये प्रवृत्ते तु काम – लोभवशङ्गते।
ईर्ष्या क्रोधादिसम्मूढ़े लोके सुखितदुःखिते।

अर्थस्तु सुस्पष्टएव ।

(1) विनीतः– नायको नम्रताविनय सम्पन्नो भवति।

यथा – यद् ब्रम्हमवादिभिः रुपासित वन्द्यपादे

विद्यातपोव्रत निधौ तपतां वरिष्ठे।

दैवात् कृतस्त्वयि मया विनयोपचार

स्तत्वं प्रसीद भगवन्नयमजलिस्ते।

यथा परशुरामं प्रतिरामः विनम्रतया वदति।

(2) मधुरः– मधुरस्तु प्रियदर्शन इति सर्वजन नयनाभिरामः। यथा महावीरचरिते रामः – राम राम नयनाभिरामतामाशयस्य सदृशी समुद्वहन्।

(3) त्यागी सर्वदायकस्त्यागीति। यथा

यथा – त्वंच कर्णः शिविर्मांसं जीवं जीमूतवाहनः।

(4) दक्षः– दीर्घसूत्रतां परित्यज्य चः क्षिप्रकारीभवति स दक्ष इत्युच्यते।

यथा – स्फूर्जद्वज सहस्रनिर्मितमिव प्रादुर्भवत्यग्रतः।

(5) प्रियंवदः रक्तलोकः प्रियंवदनीति व्युत्पुत्या प्रियभार्षा प्रियंवदो भवति प्रियंवदता च नायकस्यान्यतमो गुणो यथा उत्पत्तिर्जमदग्नितः स भगवान् देवः पीनाकी गुरूः। वीर्य यत्तु न तगिरां पथिननु व्यक्तं हि तत्कर्मभिः ।।

(7) शुचिः – शुचिः पवित्रता मानोनैर्मल्यादिना कामाद्यन – मिभूतत्वमति। यथा – कान्वंशुभे कस्य परिग्रहो वा किं वामदभ्यागम कारणं ते। आचक्ष्वमत्वा वशिनां रघूणां मनः पर स्त्री विमुख प्रवृत्तिः।।

(9) रूढ़वंश –

उच्चकुलोत्पन्नत्वं रूढ़ वंशत्वमित्ति। यथा –

ये चत्वारो दिनकर कुल क्षत्रसन्तानमल्ली मालाम्लानस्तवक मधुपाजज्ञिरे राजपुत्राः।

रामस्तेषामचरमभवस्ताडका कालरात्रिः प्रत्यूषोऽयं सुचरित कथा कन्दलीमूल कन्दः।।

नायकभेदा : गुण विशेषैष्चौतेषां नायकानां चत्वारोभेदाभवन्ति

(1) धीरललितः (2) धीरप्रशान्तः (3) धीरोदाज्ञः (4) धीरोद्धतश्चेति

दर्पमात्सर्यभूयिष्ठोमायाच्छद्मपरायणः।

धीरोद्धतः त्वहकारी चलश्चण्डो विकत्थनः।

अर्थात् धीरोद्धतो नायकोत्यधिकशूरतया शौर्यादि मदसमन्वितः , इर्ष्यालुः परगुणा सहनशीलः, मन्त्रादिवलेनाविद्यमानवस्तु प्रकाशकः, वञ्चनापरः , आस्थिर प्रकृतिकः , क्रूराचरणः , स्व गुण प्रशंसी ,वाचालश्च भवतीति।

स्पष्टमेवैतद् वर्तते यद् भाग्यपरिवर्तस्याड्कन प्रसङ्गे कस्यचित् सत्पुरूषस्य सम्पर्विपत्तौ पतनं नोभवेत् प्रदर्शितम्। यतः अनेन न तु करूणोत्पत्स्यते न वा त्रासः अपितु सहदयोपर्याधात् एव भविष्यति। किञ्च त्रासद्यां कस्यचन दुष्टस्य पात्रस्य भाग्य परिवर्तनेन विपत्तेः सम्पत्तिरूपोत्कर्षेपि नहि प्रदर्शनीयो भवति ।

यः पुरूषः अत्यन्तसच्चरित्र न्यायपरायणस्तु नो भवति , यः स्वकीयेन केनचन दुर्गुणेनाथवा पापेन नहि अपितु केनचन दौठल्येन अथवा स्खलनेन दौर्भाग्यग्रस्तो भवति , स मध्यस्थितः पुरुषः। अनेन पुरूषेण विख्यातेन समृद्धेन च भाव्यम् , यथा ओइदिपूसः श्युएस्तेसः इत्यादिकः।

त्रासद्या : नायकस्य अपेक्षिता विशेषताः

(क) त्रासद्याः नायक : सामान्यपुरुषो भवेत्। सः सहजमानवभावनायुक्तो भवेत्, येन तेन सह प्रेक्षकाणां तादात्म्यस्यात्। परञ्चेदं साम्यं प्रकृतेरेव स्यान्न तुकात्राया।

(ख) त्रासद्याः नायको वैभवशाली, यशस्वी कुलीनश्च स्यात् । राजपरिवारस्य सामन्तपरिवारस्यैव वा पुरूषाः त्रासद्या नायका भवितुमर्हाः।

<u>त्रासद्याः अड्.गसय विचारतत्वम्</u>

त्रासाद्याः आधारभूतेषु महत्वस्य दृष्ट्या विचार तृतीय स्थानं विभर्त्ति। अरस्तु वर्तमान परिस्थतौ सम्भव सड्गतयोः प्रतिपादनस्य क्षमामेव विचार तत्वं मनुते।

अरस्तु महोदयः तेषां सन्दर्भाणां प्यग्लोचनेन प्रतीयते विचारतत्त्वेन सः बुद्धितत्त्वमेवाभिप्रैयति। कस्चस्य वस्तुनोभावयोः सिद्धिः, सामान्यसत्यस्य व्यण्जिकायाः सूक्तेराख्यानम्, प्रमाणप्रतिवादौच तर्कस्याथवा बुद्धितत्त्वस्यैव कर्माणि सन्ति। परन्तु अरस्तु भाव तत्त्वानामप्यन्तर्भाववं विचारतत्त्वे अभिप्रयतीत्यत्र नास्ति विसंवादः।

भारतीय काव्य शास्त्रे विचार तत्वस्य पृथग्विवेचनं नास्ति। यत्रः तस्य वस्तु नायकरसाख्येषु त्रिषु तत्वेष्वेवान्तर्भावोभवति वस्तु विधाने निहितो विचारो वस्तुन अगमस्ति। नायकस्य विचारः तस्य व्यक्तित्वस्याड्गमस्ति। रसस्य विचारश्च रसपरिपाकस्याड्ग मस्ति । भारतीयनाटकेषु बुद्धितत्वस्य स्वीकृतिः। स्पष्टरूपेण वर्तते। तथा नाट्य शास्त्रे न तज्ज्ञानं

न तच्छिल्पं न सा विद्या न सा कला ।
न सयोगो न तत्कर्म नाट्येस्मिन् यन्न दृश्यते।

<u>**भीमस्य चरित्रचित्रणम्**</u> :– नाटकस्यास्य उत्तमधीरोद्धतनायको महाबली भीमसेनः शरीरेण शक्तिशाली , मानसिकरूपेण च दृढ़तायाः साक्षात्स्वरूपः अस्ति। सः कौरवाणां विशालां चमू एकाकी एव संहरणे क्षमः।

प्रबृद्ध यद् वैर खलु शिशोरेव कुरूभिः। इति सः आत्मानमेवाशैशवात् मूलशत्रुममन्यत। युधिष्ठिरस्य सन्धिविषयके प्रस्तावे भीमः सुस्पष्टमात्मानं सन्धे , विपरीत घोषयति – क्रुधा सन्धि भीमो विघटयति यूयं घटयत। द्रौपद्याः अपमानानलन सन्तप्तं सः दृढं निश्चयमकरोत् यत् मयि जीवति धार्तराष्ट्राः कदापि स्वस्थाः न भविष्यन्ति स्वस्थाः भवन्तु मयि जीवति धार्तराष्ट्रा। इति

<u>**दुर्योधनस्य चरित्रचित्रम्**</u> :– धृतराष्ट्रस्य ज्येष्ठः पुत्रो दुयोधनः अत्यतस्वार्थी, मदान्धः विलासी च प्रकृतनाअकस्य प्रतिनायकः अस्ति। सः आत्मतुलनाया समस्तं दुर्योधनस्य चरित्रचित्रणम् जगत् तृणवत् तुच्छं मन्यते। उग्रस्वभावोऽसौ स्वसैन्योपरि भ्रातृषु च महा विश्वसिति। अतः आत्मविजयं सुनिश्चितं मन्यते। सन्धिप्रस्तावकर्तुमागतं श्रीकृष्णमवमानयति । सोऽतीव दृढचेताप्यस्ति

सः भ्रातृषु अत्यन्तं स्निहति । भ्रातृ – मित्र – सुतवधशोकाकुलितहृदयः पितरं द्य धृतराष्ट्र जननीं गान्धारी चाश्रासयन् सः युद्धात्र विरमति –

ज्वलनः शोकजन्मा मामयं दहति दुःसहः ।
समानायं विपता मे वरं संशयितो रणः ।।

**युधिष्ठिरस्य चरित्रचित्रणम्** :– युधिष्ठिरः अयं शान्तस्वभावः न्यायशीलः सत्यवादी चास्ति । यथार्थतया संयातकोपोऽसौ समस्तनाटकस्य हेतुः । सः भ्रातृन् । बहु –स्निहति । एकस्यापि भ्रातुः रणे संहनने स स्वयमपि मृत्युं कामयते ।

**द्रौपद्याश्चरित्रचित्रणम** :– वेणीसंहारनाटकस्य स्वीया मुग्धा नायिका द्रौपदी समस्ताः ् वीराङत्रृगनाऽस्ति । स्वकुलस्य पितृ – कुलस्य च मर्यादा : तस्यै प्राण – प्रियाःसन्ति । नाटकस्यास्य समस्ता :घटनाः द्रौपदीमेव केन्द्रबिन्दुं कृत्वा चलन्ति । उन्मुक्तकेशायास्तस्याः वेणी पत्युर्भीमाय प्रेरणादायिका सजाता । भीमः ' उतंसयिष्यति कचाँस्तव देवि भीमः । इति कथयितवा स्वप्रतिज्ञा दृ पालनाय प्रयतते । एतदेव वेणी – संहारस्य मूल कारणमस्ति ।

## संदर्भ सूची

1. अरस्तू का काव्यशास्त्र सम्पादक – डॉ नागेन्द्र
2. महाभारतम् – शान्तिपर्व
3. महाभारतम् – शान्तिपर्व
4. ईशावास्योपनिषद्
5. नाट्यशास्त्रम्
6. नाट्यशास्त्रम्
7. दशरूपकम् – 2 / 1–2
8. महावीरचरितम् – परशुरामं प्रति रामस्यो ।
9. हनुमन्नाटकम् दृ श्रीदामोदरचितम्
10.दशरूपकम् अवलोकटीकायाम् दृ पृ 0 82